# Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Mangalam

# श्रीदक्षिणशेषाचलेशश्रीनिवासभगवन्मङ्गलम्

## Document Information

Text title : Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Mangalam

File name : dakShiNAsheShAchaleshashrInivAsabhagavanmangalam.itx

Category : vishhnu, mangala, venkateshwara

Location : doc_vishhnu

Author : saralakavi rAghavAchArya

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : for the Deity on the hill of Vaiyavur

Latest update : March 20, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# श्रीदक्षिणशेषाचलेशश्रीनिवासभगवन्मङ्गलम्

श्रीमते प्रसन्नवेङ्कटेशश्रीनिवासाय नमः ।
श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ॥ १॥

श्रीमद्दक्षिणशेषाद्रि शिरस्पदविहारिणे ।
प्रसन्नवेङ्कटेशाय श्रीनिवासाय मङ्गलम् ॥ २॥

सर्वमङ्गलरूपाय सर्वमङ्गलमूर्तये ।
सर्वमङ्गलदायास्तु श्रीनिवासाय मङ्गलम् ॥ ३॥

सर्वभूतशरण्याय सर्वप्रणतबन्धवे ।
सर्वकर्मभिरर्च्याय श्रीनिवासाय मङ्गलम् ॥ ४॥

सर्वन्तरात्मने सर्ववपुषे सर्वशक्तये ।
सर्वज्ञाय ब्रह्मणेऽस्तु श्रीनिवासाय मङ्गलम् ॥ ५॥

छत्रत्फणालिभोगीन्द्रभोगान्तस्स्थानमीयुषे ।
चतुर्भुजाय भद्राय श्रीनिवासाय मङ्गलम् ॥ ६॥

सर्ववेदैकवेद्याय सर्ववेदान्विजानते ।
सर्वलोकनिवासाय श्रीनिवासाय मङ्गलम् ॥ ७॥

आदिकोलेन चक्रेण वामदक्षिणपार्श्वयोः ।
भास्वराय श्रियः पत्ये श्रीनिवासाय मङ्गलम् ॥ ८॥

वामदक्षिणपाणिभ्यां पाञ्चजन्यसुदर्शनौ ।
मुदासदादधानाय श्रीनिवासाय मङ्गलम् ॥ ९॥

नमेदं मत्पदं भक्त सुतरस्स्याद्भवस्तव ।
इति सूचयते दोर्भ्यां श्रीनिवासाय मङ्गलम् ॥ १०॥

सतां भक्त्याप्रपत्त्या वा प्रसन्नाय दयालवे ।

अपवर्गप्रदायास्तु श्रीनिवासाय मङ्गलम् ॥ ११॥

अस्त्रभूषणतापन्नसर्वतत्त्वाय मायिने ।
सर्वेश्वरेश्वरायास्तु श्रीनिवासाय मङ्गलम् ॥ १२॥

सर्वश्रुत्यभिनूताय सर्वश्रेयोविधायिने ।
श्रियःकान्ताय पूर्णाय श्रीनिवासाय मङ्गलम् ॥ १३॥

चतुर्मुखादिभिः सर्वैः पूज्यमानाय निर्जरैः ।
भक्तानां सुलभायास्तु श्रीनिवासाय मङ्गलम् ॥ १४॥

रमानित्यविहाराढ्यविशालशुभवक्षसे ।
विश्वकल्याणरूपाय श्रीनिवासाय मङ्गलम् ॥ १५॥

उपत्यकाधित्यकयोर्दक्षिणस्याहिभूभृतः ।
द्विधा हनुमताच्र्याय श्रीनिवासाय मङ्गलम् ॥ १६॥

धर्मस्थापनसद्रक्षादुष्कृद् ध्वंसफलान् बहून् ।
भावानाश्रयते दिव्यान् श्रीनिवासाय मङ्गलम् ॥ १७॥

मङ्गलाशासनपरैस्सुरैस्सर्वैर्नरैरपि ।
आचार्यैश्चार्चितायास्तु श्रीनिवासाय मङ्गलम् ॥ १८॥

श्रीसीतारामसद्भक्त हृदयाम्बुजवासिने ।
तद्भक्ताभीष्टदायास्तु श्रीनिवासाय मङ्गलम् ॥ १९॥

वात्स्यराघवसूर्युक्तं श्रीनिवासाय मङ्गलम् ।
शुभदं यः पठेन्नित्यं स भवेत्सर्वमङ्गलः ॥ २०॥

इति श्रीदक्षिणशेषाचलेश श्रीनिवासभगवन् मङ्गलं सम्पूर्णम् ।
श्रीनिवासाय नमः ।

Proofread by Aruna Narayanan

*Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Mangalam*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*